CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

परिशिष्ट 'ग'

हनुमत्प्रतिष्ठाप्रकारः (पंचरात्रोक्तः)

(पा० लि० ००९९१९)

श्रीगणेशाय नमः।। अथ पांचरात्रोक्तहनुमत्प्रतिष्ठाप्रयोगः॥

देशकालौसंकीर्त्य एतद्वाष्ट्रस्य क्षेमसिध्यर्थं ममसकलऐश्वर्याभिवृद्ध्यर्थं हनुमद्देवताप्रतिष्ठां करिष्ये।

तदंगत्वेन गणेशपूजनस्वस्तिपुण्याहवाचनं मातृकापूजनं नांदीश्राद्धं आचार्यावरणं च करिष्ये॥

गणेशपूजनादिऋत्विग्वरणांतं कृत्वा प्रतिष्ठास्थानादग्रतो मंडपं कृत्वा।

अग्रतो मंडपं कृत्वा स्थानादुत्तरतोपि वा।
वारुण्यां दिशि वा कुर्यान्नैव कुर्याच्च याम्यतः॥

ऋत्विग्भिः सह सुवासिन्यग्रतः कृत्वा गंधाक्षतबलिसामग्रसी गृहीत्वा वाद्यघोषेण जलाशयं गच्छेत्। जलसमीपे स्वस्तिकं कृत्वा जलमध्यस्थं हनूमंतं स्वस्तिकोपरि निधाय भद्रंकर्णेभिसूक्ते कुशोदकेनाभ्युक्ष्य गंधपुष्पादिभिः पूजयित्वा मनोमहांतिमिति बलिं दत्वा प्रार्थयेत्।

मारुतप्रियसूनो त्वां नमामि शुभहेतवे।
प्रतिष्ठास्थानमाश्रित्य सफलोस्तु सदा मम।

ततउत्तिष्ठेतिमंत्रेण उत्थाप्य रथे तिष्ठन्निति रथमारोप्य वेदघोषैः सह मंडपमागात्य उत्तरतः स्थाप्य यदत्रेत्याद्यग्निप्रतिष्ठांतं कृत्वा ततो ग्रहस्थापनांतं कृत्वा वेदिकोपरि एकादशकलशान संस्थाप्य कलशेषु रुद्रप्रतिमां संस्थाप्य रुद्राध्यायं जपित्वा विष्णोरराटमसीति च। आज्यभागांते ग्रहहोमं तत्तद्द्रव्यैः कृत्वा ततो नमः शंभवेतिमंत्रेण विष्णोरराटमसीतिमंत्रेण हनुमते नम इति वा समित्तिलपायसाज्येन हुत्वा देवसमीपं गत्वा।

स्वागतं देवदेवेश हनुमत्पवनात्मज।
सर्वत्र त्वदधिष्ठानरक्षाहेतुकरं नृणाम्॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

इति संप्रार्थ्य पादतलस्पर्शादिदोषपरिहारार्थं मानस्तोकेतिमंत्रेण अंगानि गोमयेन लिप्य पुरुषसूक्तेन प्रक्षाल्य यवपिष्टेनोद्वर्त्य घृतेनाभ्युक्ष्य उष्णोदकेन प्रक्षाल्य गंधादिभिः संपूज्य चतुर्दिक्षु बलिं दत्वा ततः सुवर्णशलाकया चित्रंदेवानामितिमंत्रेण चक्षुरुन्मीलयेत् पुरतो नानाभक्ष्यादि दर्शयेत् । उत्तिष्ठेतिमंत्रेणोत्थाप्य शिलाया उपरिस्थापयेत् । आकृष्णेनेतिमंत्रेण सर्षपतिलपिष्टेनोद्वर्त्तयेत् । पंचामृतेन संस्नाप्य पुरुषेणेति च ततः प्राणप्रतिष्ठां कुर्यात् ॥

ततः पंचदशप्रणवावृत्या देवहृदयं स्पृष्ट्वा संस्कारा जाता इति भावयेत् । ततो कलशोदकैः रुद्राध्यायेन देवमभिषिच्य वस्त्रयज्ञोपवीताजिनमेखलाकौपीनदंडानि दत्वा पुरुषसूक्तेन षोडशोपचारैः संपूज्य वनवासिने सिंदूरं दत्वा प्रार्थयेत् ।

नमो नमस्ते भयनाशवक्त्रे नमोस्तु तुभ्यं हरिमूर्त्तिकाय ।
नमो नमस्ते सुरवंदिताय नमो नमस्तेस्तु करालवक्त्रे ।

इति क्षमाप्य ततो बलिदानं पूर्णाहुत्यंतं कृत्वा कलशोदकैर्यजमानमभिषिच्य दक्षिणादानेनआचार्यादिस्तोषयित्वा भूयंसी दत्वा यथाशक्ति ब्राह्मणान् भोजयेत् ।

॥ इतिपंचरात्रोक्तहनुमत्प्रतिष्ठा समाप्ता ॥

———

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.